दिनाङ्क :- 20.06.2025

प्रात: - 06:55

<u>सिक्किम</u>

पञ्चवर्षस्य अनन्तरमद्य सिक्किमतः कैलाशमानसरोवरयात्रा आरभ्यते। अद्यसिक्किमतः आरभ्य कैलाशमानसरोवरयात्रायाः सुचारुरूपेण संचालनाय सर्वा: सज्जाः सम्पन्ना: । राज्यपाल: ओम प्रकाश माथुर: अद्य प्रातः नथुला दर्रातः यात्रायाः ध्वजं प्रदर्शयिष्यति। सिक्किमसर्वकारः केन्द्रसर्वकारस्य विभिन्नविभागैः सह सहकार्यं कृत्वा तीर्थयात्रिणां सुचारुयात्रां सुनिश्चित्य सर्वप्रयत्नान् कुर्वन् अस्ति। प्रथमे समूहे षड्त्रिंशत् जनाः सन्ति । पर्यटन-नागर विमानन-अपर: मुख्य: सचिव: सी एस. राव: प्रोक्तवान् यत् राज्यपाल: श्रद्धालुभि: सह वार्तां विद्यास्यति।

<u>प्रधानमंत्री यात्रा</u>

प्रधानमन्त्री नरेन्द्र मोदी अद्य प्रभृति: बिहार-ओडिशा-आंध्र प्रदेशानां द्वि-दिवसीय यात्रायां भविष्यति। असौ बिहार- ओडिशयो:-कासाञ्चित् विकास-परियोजनानां शिलान्यासम् करिष्यति। अस्माकं वार्ताहरेण सूचितम् यत् मोदी श्व: आंध्र प्रदेशस्य विशाखा-पत्तनमित्यत्र एकादशमस्य अन्तर्राष्ट्रीय योग-दिवस-समारोहस्य नेतृत्वं करिष्यति।

<u>आयुष राज्य मंत्री</u>

आकाशवाणीत्यस्यै प्रदत्ते विशेष-साक्षात्कारे आयुषमन्त्री प्रतापराव जाधव: प्रोक्तवान् यत् योग: जीवनशैली वर्तते न तु एकादिवसस्य कार्यक्रम:। अत: स: जनान् अध्यर्थितवान् यत् ते योगम् स्वजीवने स्वीकुर्वन्तु। गृहेऽपि जनान् अस्यकृते प्रेरितं कुर्यः।

गृहमंत्री अमित शाह:

केन्द्रीय गृहमंत्री अमित शाह: अद्य बेङ्गलूरुनगरे आदिचुंचनगिरी विश्वविद्यालयरस्य परिसरस्य उद्घाटनं करिष्यति। सोशल मीडिया पोस्ट् मध्ये शाहः अवदत् यत् अद्य सः आदिचुंचनगिरी विश्वविद्यालयस्य परिसरस्य उद्घाटनसमारोहे भागं गृहीष्यति।

इरान/इजरायल

इरान्-इजरायल देशयोः-सङ्घर्षः वर्धमानः अस्ति; इरान्-क्षेपणास्त्र-आक्रमणेन मध्य-दक्षिण-इजरायल-देशे महती क्षतिः अभवत्। इजरायलेन इरानस्य परमाणुसंयंत्रे आक्रमणं कृतम्। इजरायल-इरान्-देशयोः मध्ये सप्तमे दिने अपि द्वन्द्वः प्रचलति स्म । इरानस्य क्षेपणास्त्रैः मध्यदक्षिण इजरायलस्य अनेकस्थानेषु महती क्षतिः कृता। इजरायलस्य सुरक्षाबलैः इरानस्य अराक् बृहत्जलपरमाणुअभियांत्रिकस्य उपरि आक्रमणं कृतम्। इरानस्य विदेशमन्त्री अब्बास अराघची अद्य जेनेवानगरे यूरोपीयसङ्घस्य विदेशनीतिप्रमुखेण काजा कल्लास् इत्यनेन सह ब्रिटेन-फ्रांस्-जर्मनी-देशानाम् विदेशमन्त्रिभिः सह मेलनं विधास्यति।

भारत-इग्लैण्ड दलयो:

भारत-इग्लैण्ड दलयो: टेस्ट क्रिकेट स्पर्धा श्रड्खला अद्य प्रभृति: प्रारभ्यते। स्पर्धा हेडिंग्ली-क्रिकेट-प्राड्णात् प्राराप्स्यते। अपराह्ने सार्ध त्रिवादने भविष्यति। रोहित-शर्मण: अनुपास्थित्यां सर्वेषां चक्षु: शुभमन गिलोपरि स्थास्यति।

भारतीय उपकप्तान इति ऋषभ पंत: स्वभूमिकाया: उत्तरदायित्वस्यविषये इत्थं वदति।

## मौसम

दक्षिणपश्चिमप्रावृट् बिहारं पूर्वोत्तरप्रदेशं च प्राप्तवान् इति ऋतुविभागेन सूचितम्। ऋतुविभागस्य वरिष्ठवैज्ञानिकः आरके जेनामणिः आकाशवाणयै अवदत् यत् आगामिषु द्वि-त्रदिनेषु उत्तरे मध्यभारते च प्रावृट्: सक्रियता भविष्यति। प्रचण्डवृष्टेः विषये वदन् झारखण्ड , बिहार, बंगाल, ओडिशा, छत्तीसगढ मध्यप्रदेश इत्यादिषु स्थानेषु भवितुमर्हति । अनेन सह वायव्यभारते मुख्यतया गुजरात गोवा कोङ्कनक्षेत्रे रेड अलर्रट प्रसारिता । मुम्बईक्षेत्रे ऑरेन्ज अलर्ट सन्चेतना प्रसारिता।

## शिलाङ्गस्य स्थानीयन्यायालयेन

इन्दौर-नगरस्य व्यापारी राजा रघुवंशी इत्यस्य हत्याप्रकरणस्य प्रमुखाभियुक्ते सोनम रघुवंशी तथा राज कुशवाहा इत्येतयोः कृते पुलिस-अभिरक्षणस्य कृते निगृहणं कृतम्। अभियोक्ता टी.चन्द्रः अवदत् यत् शेषत्रय: आरोपिणः चतुर्दश दिवसस्य न्यायिकनिग्रहे स्थापिताः सन्ति।